# मूलरामायणम्



तं व्रजन्तं प्रियो भ्राता लक्ष्मणोऽनुजगाम ह ।
स्नेहाद्विनयसम्पन्नः सुमित्रानन्दवर्धनः ।। 1.1.25 ।।
भ्रातरं दयितो भ्रातुः सौभ्रात्रमनुदर्शयन् ।

पदच्छेदः – तं व्रजन्तं प्रियः भ्राता लक्ष्मणः अनुजगाम ह स्नेहात् विनय-सम्पन्नः सुमित्रानन्द-वर्धनः । भ्रातरं दयितः भ्रातुः सौभ्रात्रम् अनुदर्शयन्

पदपरिचयः –
तं व्रजन्तं = वनं गच्छन्तं श्रीरामम्
प्रियः भ्राता लक्ष्मणः = प्रीतिपात्रः रामस्य अनुजः
अनुजगाम = अनुसृतवान्
स्नेहाद् = प्रेम्णा
विनयसम्पन्नः = विनम्रः
सुमित्रानन्द-वर्धनः = मातुः सुमित्रायाः हर्ष-जनकः

पदपरिचयः –
भ्रातरम् = श्रीरामम्
दयितः = प्रियः
भ्रातुः = रामस्य
सौभ्रात्रम् = श्रेष्ठं सहोदर-भावम्
अनुदर्शयन् = आचरन्

तं व्रजन्तं प्रियो भ्राता लक्ष्मणोऽनुजगाम ह ।
स्नेहाद्विनयसम्पन्नः सुमित्रानन्दवर्धनः ।। 1.1.25 ।।
भ्रातरं दयितो भ्रातुः सौभ्रात्रमनुदर्शयन् ।

व्रज् + शतृ (द्वि.वि. ए) = व्रजन्तम्

भ्राजते (shines/sparkles) इति भ्राता, भ्राज् (दीप्तौ)

सहोदरः, सोदरः, सगर्भः, सहजः, भ्राता –कोषः

लक्ष्मन् + न (प्रशस्तानि लक्षणानि अस्य सन्ति इति) =लक्ष्मणः

अनु + गम् (लिट्, प्र.पु.ए.) = अनुजगाम

स्निह् (स्नेहे) (प.वि.ए) = स्नेहात्

विनयेन सम्पन्नः = विनयसम्पन्नः

आनन्दं वर्धयति इति = आनन्दवर्धनः (उपपदकर्मधारयः)

वर्धनः = वृध् + णिच् + ल्युट्

सुमित्रायाः अनन्दवर्धनः = सुमित्रानन्दवर्धनः (ष.तत्)

दया + इतच् = दयितः

सुभ्रातुः भावः = सौभ्रात्रम् (ष्यञ्)

अनु+दृश्+णिच्+शतृ = अनुदर्शयन्

तं व्रजन्तं प्रियो भ्राता लक्ष्मणोऽनुजगाम ह ।
स्नेहाद्विनयसम्पन्नः सुमित्रानन्दवर्धनः ।। 1.1.25 ।।
भ्रातरं दयितो भ्रातुः सौभ्रात्रमनुदर्शयन् ।

अभीष्ट, अभीप्सित, हृद्य, दयित, वल्लभ, प्रिय – अमरः

अन्वयः
भ्रातुः दयितः विनयसम्पन्नः सुमित्रानन्दवर्धनः भ्राता लक्ष्मणः सौभ्रात्रम् अनुदर्शयन् व्रजन्तं तं भ्रातरं स्नेहाद् अनुजगाम ह ।

रामस्य दयिता भार्या नित्यं प्राणसमा हिता ।। 1.1.26 ।।
जनकस्य कुले जाता देवमायेव निर्मिता ।
सर्वलक्षणसम्पन्ना नारीणामुत्तमा वधूः ।। 1.1.27 ।।
सीताप्यनुगता रामं शशिनं रोहिणी यथा ।
पौरैरनुगतो दूरं पित्रा दशरथेन च ।। 1.1.28 ।।

पदच्छेदः – रामस्य दयिता भार्या नित्यं प्राण-समा हिता जनकस्य कुले जाता देवमाया इव निर्मिता सर्व-लक्षण-सम्पन्ना नारीणाम् उत्तमा वधूः सीता अपि अनुगता रामं शशिनं रोहिणी यथा पौरैः अनुगतः दूरं पित्रा दशरथेन च

रामस्य दयिता भार्या नित्यं प्राणसमा हिता ।। 1.1.26 ।।
जनकस्य कुले जाता देवमायेव निर्मिता ।
सर्वलक्षणसम्पन्ना नारीणामुत्तमा वधूः ।। 1.1.27 ।।
सीताप्यनुगता रामं शशिनं रोहिणी यथा ।
पौरैरनुगतो दूरं पित्रा दशरथेन च ।। 1.1.28 ।।

पदपरिचयः –

रामस्य दयिता भार्या = रामस्य प्रिया पत्नी
नित्यं प्राणसमा हिता = सर्वदा प्राणसदृशी हितकारिणी
जनकस्य कुले जाता = विदेहराजस्य वंशे उत्पन्ना
देवमाया इव निर्मिता = मोहिनी इव रूपवती
सर्वलक्षण-सम्पन्ना = सर्व-मङ्गल-लक्षण-सहिता
नारीणाम् उत्तमा = स्त्रीषु श्रेष्ठा
वधूः = दशरथस्य स्नुषा

पदपरिचयः –

सीता अपि अनुगता रामं = जानकी देवी अपि रामं वनम् अनुसृतवती
शशिनं रोहिणी यथा = यथा चन्द्रस्य पत्नी रोहिणी पतिम् अनुकरोति तथा
पौरैः अनुगतः दूरम् = पुरवासिभिः अपि बहु दूरं यावत्
पित्रा दशरथेन च = जनकेन दशरथेन अपि बहु दूरम् अनुसृतम्

रामस्य दयिता भार्या नित्यं प्राणसमा हिता ।। 1.1.26 ।।
जनकस्य कुले जाता देवमायेव निर्मिता ।
सर्वलक्षणसम्पन्ना नारीणामुत्तमा वधूः ।। 1.1.27 ।।
सीताप्यनुगता रामं शशिनं रोहिणी यथा ।
पौरैरनुगतो दूरं पित्रा दशरथेन च ।। 1.1.28 ।।

प्राणैः समा = प्राणसमा (तृ.तत्)

सर्वाणि च तानि लक्षणानि = सर्वलक्षणानि (कर्मधा)

सर्वलक्षणैः सम्पन्ना = सर्वलक्षणसम्पन्ना (तृ.तत्)

मा (माने) - मीयते इति माया

जनि (प्रादुर्भावे)+क्त = जाता

निर् + मा (माने) + क्त = निर्मिता

अनु + गम् + क्त = अनुगता

पुरे भवाः = पौराः तैः = पौरैः (तद्धितान्तः)

**समासगत-लुप्तोपमा**

प्राणसमा

देवमायेव

**पूर्णोपमा**

शशिनं रोहिणी

रामस्य दयिता भार्या नित्यं प्राणसमा हिता ।। 1.1.26 ।।
जनकस्य कुले जाता देवमायेव निर्मिता ।
सर्वलक्षणसम्पन्ना नारीणामुत्तमा वधूः ।। 1.1.27 ।।
सीताप्यनुगता रामं शशिनं रोहिणी यथा ।
पौरैरनुगतो दूरं पित्रा दशरथेन च ।। 1.1.28 ।।

जाया, दारा, पाणिगृहीत्री, द्वितीया, सहधर्मिणी, भार्या - अमरः

अन्वयः
जनकस्य कुले जाता देवमाया इव निर्मिता सर्वलक्षणसम्पन्ना नारीणाम् उत्तमा वधूः
रामस्य दयिता नित्यं प्राणसमा हिता भार्या सीता अपि – रोहिणी शशिनं यथा
(अनुकरोति तथा) रामम् अनुगता । पौरैः पित्रा दशरथेन च (रामः) दूरं अनुगतः ।

शृङ्गवेरपुरे सूतं गङ्गाकूले व्यसर्जयत् ।
गुहमासाद्य धर्मात्मा निषादाधिपतिं प्रियम् ।। 1.1.29 ।।

पदच्छेदः – शृङ्गवेर-पुरे सूतं गङ्गाकूले व्यसर्जयत् गुहम् आसाद्य धर्मात्मा निषादाधिपतिं प्रियम्

पदपरिचयः –
शृङ्गवेर-पुरे – शृङ्गवेरपुर-नामके ग्रामे
सूतम् = सारथिम्
गङ्गा-कूले = भागीरथीनद्याः तटे
व्यसर्जयत् = परावर्तितवान् (प्रेषितवान्)
गुहम् आसाद्य = गुहनामकं पुरुषम् प्राप्य
धर्मात्मा = श्रीरामः
निषादाधिपतिं प्रियम् = निषाद-जाति-स्वामिनं प्रियमित्रम्

श्रृङ्गवेरपुरे सूतं गङ्गाकूले व्यसर्जयत् ।
गुहमासाद्य धर्मात्मा निषादाधिपतिं प्रियम् ।। 1.1.29 ।।

श्रृङ्गमिव वेरम् (अवयवम्) यस्य इति श्रृङ्गवेरम्

श्रृङ्गवेरम् आर्द्रकम् इति अमरः

श्रृङ्गवेरम् प्रधानं पुरम् तस्मिन् = श्रृङ्गवेरपुरे (मध्यमपदलोपी)

गङ्गायाः कूलं तस्मिन् = गङ्गाकूले (ष.तत्)

व्यसर्जयत् = वि + सृ (णिचि) -लङ्-प्रपु.ए

आ+सद् +ल्यप् = आसाद्य

धर्मः आत्मा (स्वभावः) यस्य सः = धर्मात्मा

निषादानाम् अधिपतिः तम् = निषादाधिपतिम्

तीरम्, प्रतीरम्, रोधः, तटम्, कूलम् – अमरः

श्रृङ्गवेरपुरे सूतं गङ्गाकूले व्यसर्जयत् ।
गुहमासाद्य धर्मात्मा निषादाधिपतिं प्रियम् ।। 1.1.29 ।।

| | |
|---|---|
| कः व्यसर्जयत् ? | धर्मात्मा (रामः) |
| कं व्यसर्जयत् | सूतम् |
| कुत्र? | श्रृङ्गवेरपुरे, गङ्गाकूले |
| किं कृत्वा ? | गुहम् आसाद्य |
| कीदृशं गुहम् | निषादाधिपतिं प्रियम् |

**अन्वयः**

धर्मात्मा (रामः) श्रृङ्गवेरपुरे गङ्गाकूले प्रियं निषादाधिपतिं गुहम् आसाद्य सूतं व्यसर्जयत्

# रामायणे अयं सन्दर्भः

नेदानीम् गुह योग्योऽयम् वासो मे सजने वने |
अवश्यम् ह्याश्रमे वासः कर्तव्यस्तद्गतो विधिः || २-५२-६६

सोऽहम् गृहीत्वा नियमं तपस्विजनभूषणम् |
हितकामः पितुर्भूयः सीताया लक्ष्मणस्य च || २-५२-६७
जटाः कृत्वा गमिष्यामि न्यग्रोधक्षीरम् आनय |

तत् क्षीरम् राज पुत्राय गुहः क्षिप्रम् उपाहरत् || २-५२-६८
लक्ष्मणस्य आत्मनः चैव रामः तेन अकरोत् जटाः

पुत्रः दशरथस्य अयं महाराजस्य धीमतः |
निदेशम् पालयतु एनम् गङ्गे त्वद् अभिरक्षितः || २-५२-८३
चतुर्दश हि वर्षाणि समग्राणि उष्य कानने |
भ्रात्रा सह मया चैव पुनः प्रत्यागमिष्यति || २-५२-८४
ततः त्वाम् देवि सुभगे क्षेमेण पुनरागता |
यक्ष्ये प्रमुदिता गङ्गे सर्व-काम-समृद्धये || २-५२-८५

गुहेन सहितो रामो लक्ष्मणेन च सीतया ।
ते वनेन वनं गत्वा नदीस्तीर्त्वा बहूदकाः ।। 1.1.30 ।।

चित्रकूटमनुप्राप्य भरद्वाजस्य शासनात् ।
रम्यमावसथं कृत्वा रममाणा वने त्रयः ।। 1.1.31 ।।

देवगन्धर्वसङ्काशास्तत्र ते न्यवसन् सुखम् ।

पदच्छेदः – गुहेन सहितः रामः लक्ष्मणेन च सीतया ते वनेन वनं गत्वा नदीः तीर्त्वा बहूदकाः चित्रकूटम् अनुप्राप्य भरद्वाजस्य शासनात् रम्यम् आवसथं कृत्वा रममाणाः वने त्रयः देव-गन्धर्व-सङ्काशाः तत्र ते न्यवसन् सुखम्

पदपरिचयः –

गुहेन सहितः रामः लक्ष्मणेन च सीतया = गुहेन लक्ष्मणेन सीतया च सहितः रामचन्द्रः

वनेन वनं गत्वा नदीः तीर्त्वा बहूदकाः = अरण्याद् अरण्यं गत्वा गभीराः नदीः तीर्त्वा

चित्रकूटम् अनुप्राप्य भरद्वाजस्य शासनात् = भरद्वाज-नाम-मुनेः आज्ञया चित्रकूट-नामकं पर्वत-स्थानं प्राप्य

रम्यम् आवसथं कृत्वा रममाणाः वने त्रयः = मनोहरं पर्णशालां निर्माय ते त्रयः विहरन्तः

देव-गन्धर्व-सङ्काशाः तत्र ते न्यवसन् सुखम् = देव-गन्धर्व-तुल्याः तत्र सुखेन निवासं कृतवन्तः

गुहेन सहितो रामो लक्ष्मणेन च सीतया ।
ते वनेन वनं गत्वा नदीस्तीर्त्वा बहूदकाः ।। 1.1.30 ।।

चित्रकूटमनुप्राप्य भरद्वाजस्य शासनात् ।
रम्यमावसथं कृत्वा रममाणा वने त्रयः ।। 1.1.31 ।।

देवगन्धर्वसङ्काशास्तत्र ते न्यवसन् सुखम् ।

बहूनि उदकानि यासु ताः = बहूदकाः

चित्राः कूटाः यस्य सः तम् = चित्रकूटम्

देवाः च गन्धर्वाः च = देवगन्धर्वाः (द्वन्द्व)

देवगन्धर्वैः सङ्काशाः = देवगन्धर्वसङ्काशाः (तृ.तत्)

शास् +ल्युट् = शासनात् (प.वि)

नि+वस् – लङ् –प्र.पु.ए. = न्यवसन्

रम् +यत् = रम्यम्

कूटमस्त्री शिखरं शृङ्गम् - अमरः

गुहेन सहितो रामो लक्ष्मणेन च सीतया ।
ते वनेन वनं गत्वा नदीस्तीर्त्वा बहूदकाः ।। 1.1.30 ।।

चित्रकूटमनुप्राप्य भरद्वाजस्य शासनात् ।
रम्यमावसथं कृत्वा रममाणा वने त्रयः ।। 1.1.31 ।।

देवगन्धर्वसङ्काशास्तत्र ते न्यवसन् सुखम् ।

अन्वयः
गुहेन लक्ष्मणेन सीतया च सहितः रामः ते, वनेन वनं गत्वा बहूदकाः नदीः तीर्त्वा भरद्वाजस्य शासनात् चित्रकूटम् अनुप्राप्य तत्र रममाणाः देवगन्धर्वसङ्काशाः ते त्रयः रम्यम् आवसथं कृत्वा सुखं न्यवसन्



# क्रिया-विशेषणम्

सुखं न्यवसत्

मन्दं हसति ।

स्पष्टं वदति ।

खादति (सानन्द)

गायति (मधुर)

उच्चारयति (सुष्ठु)

गच्छति (शीघ्र)